# Gajendramokshanah from VishnudharmottarapurAna

# વિષ્ણુધર્મોત્તરપુરાણે ગજેન્દ્રમોક્ષણઃ

## Document Information


Text title : Gajendramokshanah from Vishnudharmottarapurana

File name : gajendramokShaNaH_viShNudharmottara.itx

Category : vishhnu, stotra, vishnu, viShNudharmottarapurANa

Location : doc_vishhnu

Description/comments : viShNudharmottarapurANa | adhyAya 194/1-74|| stuti 29-48

Latest update : September 14, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2024

*sanskritdocuments.org*

# વિષ્ણુધર્મોત્તરપુરાણે ગજેન્દ્રમોક્ષણઃ

વજ ઉવાચ ।
ભગવઞ્છ્રોતુમિચ્છામિ ગજેન્દ્રસ્ય વિમોક્ષણમ્ ।
વિસ્તરેણ મહાભાગ શાપાન્નક્રસ્ય ચોભયોઃ ॥ ૧॥

માર્કણ્ડેય ઉવાચ ।
અસ્ત્યસ્મિઞ્છૃઙ્ગવાન્નામ જમ્બૂદ્વીપે કુલાચલઃ ।
મહાધાતુસમુન્નદ્ધૈર્યુતઃ શૃઙ્ગૈર્નભઙ્કુષૈઃ ॥ ૨॥

યસ્ય શૃઙ્ગત્રયં મધ્યં ભાતિ રાજન્વિશેષવત્ ।
બ્રહ્માર્કસોમનિલયં મનોહારિ દિવં ગતમ્ ॥ ૩॥

તેષામથૈકં સૌવર્ણમપરં રાજતં મહત્ ।
સર્વરત્નમયં ચૈકં મધ્યમં બ્રહ્મણઃ ક્ષયમ્ ॥ ૪॥

કાઞ્ચનં સૂર્યનિલયં રાજતં શશિનઃ ક્ષયમ્ ।
ત્રિકૂટં શૈલરાજાભં રત્નપક્ષદ્રુમૈર્યુતમ્ ॥ ૫॥

ન તત્કૃતઘ્નાઃ પશ્યન્તિ ન નૃશંસા ન નાસ્તિકાઃ ।
નાતપ્તતપસઃ કેચિન્નૈવ પાપકૃતો જનાઃ ॥ ૬॥

તસ્ય સાનુમતઃ પૃષ્ઠે સરો વ્યાકોશપઙ્કજમ્ ।
કારણ્ડવસમાકીર્ણં રાજહંસોપશોભિતમ્ ॥ ૭॥

સચ્ચિત્તમિવ ગમ્ભીરં સચ્ચિત્તમિવ નિર્મલમ્ ।
બહૂપયોગ્યં ચ તથા સતાન્નિષ્કૃતિકૃન્નૃપ ॥ ૮॥

મીનચ્છિન્નાભ્રશકલસ્ફુટકહ્લારતારકમ્ ।
મહાકુમુદરાત્રીશં દ્વિતીયમિવ ચામ્બરમ્ ॥ ૯॥

ઉત્ફુલ્લપદ્મરજસા મધુપૈઃ પરિ પિઞ્જરૈઃ ।
સમન્તાદ્વ્યાપ્ય સત્પદ્મં તપનીયસમૈરિવ ॥ ૧૦॥

ચ્યુતેન પદ્માદ્રજસા હંસૈઃ કેશરમન્થનૈઃ ।
વાયુના ભ્રામ્યમાણેન દુર્વિભાવ્યોદકોમ્બુજમ્ ॥ ૧૧॥

મહાન્તઃ પદ્મિનીપત્રા વાયુભ્રસ્તાભ્રશીકરૈઃ ।
યુક્તા મુક્તાફલાકારૈર્યત્ર ભાન્તિ સહસ્રશઃ ॥ ૧૨॥

નૃત્યન્તિ કમલા યત્ર શફરી સ્ફુરણાહતાઃ ।
ભ્રમરોદ્ગીતસઙ્ઘોષૈ રસત્સારસનાદિકમ્ ॥ ૧૩॥

હસન્તમિવ હંસૌઘૈર્નૃત્યન્તમિવ ચોર્મિભિ ।
ઉદ્ગીથમિવ કુર્વાણં કારણ્ડવરવૈઃ શુભૈઃ ॥ ૧૪॥

મધ્યે ત્વગાધં ચતુરઃ પ્રતીહારૈરિવોદ્ધતૈઃ ।
ઉત્સારયન્તં કલ્લોલૈર્વાયુક્ષિપ્તદ્રુમોદ્ભવાન્ ॥ ૧૫॥

ભ્રમરાન્તરસંલીનકહ્લારકુસુમાક્ષુભિઃ ॥

પશ્યન્તમિવ શૈલસ્ય શૃઙ્ગાણાં તન્મહોચ્છ્રયમ્ ॥ ૧૬॥

યત્રાતિશીતલં તોયં લઘુ સ્વાદુ સુધાનિભમ્ ।
અન્યચ્છ્રઙ્ગં મનોહારિ ભૃઙ્ગનાદ નિનાદિતમ્ ॥ ૧૭॥

તસ્મિન્સરસિ દુષ્ટાત્મા વિરૂપોઽન્તર્જલેશયઃ ।
હૂહૂર્જગામ ગ્રાહત્વં શાપાદ્વૈ દેવલસ્ય તુ ॥ ૧૮॥

તસ્મિન્નેવ તથા શૈલે હાહા ગન્ધર્વસત્તમઃ ।
બભૂવ યૂથપો હસ્તી ચલત્પર્વતસન્નિભઃ ॥ ૧૯॥

અથ દન્તોજ્જ્વલવપુઃ કદાચિદ્ગજયૂથપઃ ।
આજગામ મહીપાલ ચોત્ફુલ્લ કમલં સરઃ ॥ ૨૦॥

વંશદણ્ડૈઃ સ કલભૈર્વૃતશ્ચૈવ કરરેણુભિઃ ।
વાસયન્મદગન્ધેન તં ત્રિકૂટં મહીધરમ્ ॥ ૨૧॥

સ ગજોઽઞ્જનસઙ્કાશો મદાકુઞ્ચિતલોચનઃ ।
સલીલં પઙ્કજવને યૂથમધ્યગતો વ્રજમ્। ૨૨॥

ગૃહીતસ્તેન રૌદ્રેણ ગ્રાહેણાવ્યક્તમૂર્તિના ।
પશ્યતઃ સર્વયૂથસ્ય ક્રોશતશ્ચાતિ દારુણમ્ ॥ ૨૩॥

સ ચકાર મહાયત્નમાત્મનઃ પરિમોક્ષણે ।

ગ્રાહોઽપિ યત્નમાતિષ્ઠત્કુઞ્જરાકર્ષણે મહાન્ ॥ ૨૪॥

ગ્રાહોઽપિ બલિનં નાગં ન શશાક મહામ્ભસિ ।
આક્રષ્ટું ન ચ નાગોઽપિ તથાત્માનં વિમોક્ષિતુમ્ ॥ ૨૫॥

વિસ્ફૂર્જ્ય ચ યથાશક્તિ વિક્રુષ્ય ચ મહારવાન્ ।
વ્યથિતઃ સ નિરુદ્યોગઃ પશ્ચિમામાગતો દશામ્ ॥ ૨૬॥

સ તુ નાગવરઃ શ્રીમાન્નારાયણપરાયણઃ ।
જગામ શરણં વિષ્ણું તુષ્ટાવ ચ પરન્તપઃ ॥ ૨૭॥

ગૃહીત્વા સ કરાગ્રેણ સરસઃ કમલોત્તમમ્ ।
નિવેદ્ય ભક્ત્યા કૃષ્ણાય ગજઃ સ્તોત્રમુદીરયત્ ॥ ૨૮॥

ગજ ઉવાચ ।
નમોનમઃ કારણવામનાય નારાયણાયાસુરદારણાય ।
શ્રીશાર્ઙ્ગચક્રાસિગદાધરાય નમોઽસ્તુ તસ્મૈ પુરુષોત્તમાય ॥ ૨૯॥

આદ્યાય વેદનિલયાય મહોરગાય સિંહાય દૈત્યનિલયાય ચતુર્ભુજાય ।
બ્રહ્મેન્દ્રરુદ્રમુનિચારણસંસ્તુતાય દેવોત્તમાય વરદાય નમોઽચ્યુતાય ॥ ૩૦॥

નાગેન્દ્રભોગશયનાસનસુપ્રિયાય ગોક્ષીરહેમશુકનીલઘનોપમાય ।
પીતામ્બરાય મધુકૈટભનાશનાય ભક્તપ્રિયાય વરદીપ્તસુદર્શનાય ॥ ૩૧॥

નાભિપ્રજાતકમલસ્થચતુર્મુખાય ક્ષીરોદકાર્ણવનિકેતયશોધરાય ।
નાનાવિચિત્ર મુકુટાઙ્ગદભૂષણાય સર્વેશ્વરાય વિજયાય નમો વરાય ॥ ૩૨॥

વિશ્વાત્મને પરમકારણકારણાય ફુલ્લારવિન્દવિપુલાયતલોચનાય ।
દેવેન્દ્રભાવન પરીક્ષિતપૌરુષાય યોગીશ્વરાય વિજયાય નમો વરાય ॥ ૩૩॥

લોકાયનાય ત્રિદશાયનાય બ્રહ્માયણાયાત્મગુણાયનાય ।
ધર્માયણાયૈકજનાયનાય મહાવરાહાય સદા નતોઽસ્મિ ॥ ૩૪॥

અચિન્ત્યમવ્યક્તમનન્તરૂપં નારાયણં કારણમાદિદેવમ્ ।
યુગાન્તશેષં પુરુષં પુરાણં તં વાસુદેવં શરણં પ્રપદ્યે ॥ ૩૫॥

અદૃશ્યમચ્છેદ્યમનાદિમધ્યં મહર્ષયો બ્રહ્મનિધિં સુરેશમ્ ।
વદન્તિ યં વૈ પુરુષં સનાતનં તં વાસુદેવં શરણં પ્રપદ્યે ॥ ૩૬॥

યમક્ષરં બ્રહ્મ વદન્તિ સર્વગં નિશમ્ય યં મૃત્યુમુખાત્પ્રમુચ્યતે ।
તમીશ્વરં દૃપ્તમનુત્તમૈર્ગુણૈઃ પરાયણં વિષ્ણુમુપૈતિ શાશ્વતમ્ ॥ ૩૭॥

કાર્યક્રિયાકારણમપ્રમેયં હિર ણ્યનાભં કનકારવિન્દમ્ ।
મહાબલં વેદનિધિં સુરોત્તમં વ્રજામિ વિષ્ણું શરણં જનાર્દનમ્ ॥ ૩૮॥

વિચિત્રકેયૂરમહાર્હનિષ્કં રત્નોત્તમાલઙ્કૃતસર્વ ગાત્રમ્ ।
પીતામ્બરં કાઞ્ચનભક્તિચિત્રં માલાધરં કેશવમભ્યુપૈમિ ॥ ૩૯॥

ભવોદ્ભવં વેદવિદાં વરિષ્ઠં યોગાત્મનાં સાઙ્ખ્યવિદાં વરિષ્ઠમ્ ।
આદિત્યચન્દ્રાશ્વિવસુપ્રભાવં પ્રભું પ્રપદ્યેઽચ્યુતમાત્મભૂતમ્ ॥ ૪૦॥

શ્રીવત્સાઙ્કં મહાદેવં વેદગુહ્યમનુત્તમમ્ ।
પ્રપદ્યે સૂક્ષ્મમચલં ભક્તાનામભયપ્રદમ્ ॥ ૪૧॥

પ્રભવં સર્વલોકાનાં નિર્ગુણં ચ ગુણાત્મનામ્ ।
પ્રપદ્યે મુક્તસઙ્ગાનાં યતીનાં પરમાં ગતિમ્ ॥ ૪૨॥

ભગવન્તં સુરાધ્યક્ષમક્ષરં પુષ્કરેક્ષણમ્ ।
શરણ્યં શરણં ભક્ત્યા પ્રપદ્યે બ્રાહ્મણપ્રિયમ્ ॥ ૪૩॥

બ્રહ્માદેશં ત્રિલોકેશમાદ્યમેકમનામયમ્ ।
ભૂતાત્માનં મહાત્માનં પ્રપદ્યે મધુસૂદનમ્ ॥ ૪૪॥

ક્ષેત્રજ્ઞં પુરુષં વિષ્ણું ત્રિગુણાતીતમવ્યયમ્ ।
નારાયણમણીયાંસં પ્રપદ્યે શરણં હરિમ્ ॥ ૪૫॥

એકાય લોકતન્ત્રાય પરતઃ પરમાત્મને ।
નમઃ સહસ્રશિરસે અનન્તાય મહાત્મને ॥ ૪૬॥

વરેણ્યમનઘં દેવમૃષયો વેદપારગાઃ ।
કીર્તયન્ત્યભવં સર્વે તં પ્રપદ્યે સનાતનમ્ ॥ ૪૭॥

નમસ્તે પુણ્ડરીકાક્ષ ભક્તાનામભયપ્રદ ।
સુબ્રહ્મણ્ય નમસ્તેઽસ્તુ ત્રાહિ માં શરણાઽગતમ્ ॥ ૪૮॥

માર્કણ્ડેય ઉવાચ ।
ભક્તિં તસ્ય તુ સઞ્ચિન્ત્ય નાગસ્યાઽમોઘસંસ્તવઃ ।
પ્રીતિમાનભવદ્રાજન્સદ્યશ્ચક્રગદાધરઃ ॥ ૪૯॥

સાન્નિધ્યં કલ્પયામાસ ગ્રાહં ચક્રેણ માધવઃ ।
મોક્ષયામાસ ચ ગજં પાશેભ્યઃ શરણાગતમ્ ॥ ૫૦॥

સ હિ દેવલશાપેન હાહા ગન્ધર્વસત્તમઃ ।
ગજત્વમભવત્ત્યક્ત્વા મોક્ષં પ્રાપ્ય દિવં ગતઃ ॥ ૫૧॥

ગ્રાહાદ્વિમુક્તઃ સદ્યસ્તુ ગજો ગન્ધર્વતાં ગતઃ ।
ગ્રાહો ગન્ધર્વતાં પ્રાપ્તો યઃ કૃષ્ણેન નિપાતિતઃ ॥ ૫૨॥

તસ્યાપિ દેવલકૃતઃ શાપદોષોઽભવત્પુરા ।
પ્રીતિમાંસ્ત્રાયતે વિષ્ણુઃ સદ્યઃ સંસારસાગરાત્ ॥ ૫૩॥

ક્રુદ્ધોઽપિ નિઘ્નન્દેવત્વમરાતીનાં પ્રયચ્છતિ ।
તૌ ચ સ્વં સ્વં વપુઃ પ્રાપ્ય પ્રણિપત્ય જનાર્દનમ્ ॥ ૫૪॥

ગન્ધર્વાધિપતી શીઘ્રં પરાં નિર્વૃતિમાગતૌ ।
ઇદં ચૈવ મહાબાહો પુરા દેવોઽભ્યભાષત ॥ ૫૫॥

દૃષ્ટ્વા મુક્તૌ ગજગ્રાહૌ ભગવાન્મધુસૂદનઃ ।
યોઽગ્રહીન્નાગરાજં ચ માં ચૈવ પ્રણિધાનવાન્ ॥ ૫૬॥

સ્મરિષ્યતિ સરશ્ચેદં યુવયોર્મોક્ષણં તથા ।
ગુલ્મં કીચકવેણૂનામિમં શૈલવરં તથા ॥ ૫૭॥

અશ્વત્થં ભાસ્કરં ગઙ્ગાં નૈમિષારણ્યમેવ ચ ।
પ્રયાગં બ્રહ્મતીર્થં ચ દણ્ડકારણ્યમેવ ચ ॥ ૫૮॥

સંસ્મરિષ્યન્તિ યે મર્ત્યા સમ્યક્છ્રોષ્યન્તિ ચાપિ યે ।
ન તે દુઃસ્વપ્નપાપસ્ય ભોક્તારો મત્પરિગ્રહાત્ ॥ ૫૯॥

સર્વપાપૈર્વિમોક્ષ્યન્તિ કલ્યાણાનાં ચ ભાગિનઃ ।
ભવિષ્યન્તિ તથા પુણ્યાં ગતિં યાસ્યન્તિ માનવાઃ ॥ ૬૦॥

દુઃસ્વપ્નં ચ નૃણાં તેષાં સુસ્વપ્નત્વં પ્રયાસ્યતિ ।
કૌર્મ્યં માત્સ્યં ચ વારાહં વામનં તાર્ક્ષ્યમેવ ચ ॥ ૬૧॥

નારસિંહં તથા રૂપં સૃષ્ટિપ્રલયકારકમ્ ।
એતાનિ પ્રાતરુત્થાય સંસ્મરિષ્યન્તિ યે નરાઃ ॥ ૬૨॥

સર્વપાપૈર્વિશુદ્ધાસ્તે યાસ્યન્તિ પરમાં ગતિમ્ ।
માર્કણ્ડેય ઉવાચ ।
એવમુક્ત્વા તુ રાજેન્દ્ર દેવદેવો જનાર્દનઃ ॥ ૬૩॥

અસ્પૃશદ્ગજગન્ધર્વં ગ્રાહગન્ધર્વમેવ ચ ।

તેન સ્પૃષ્ટૌ તુ તૌ સદ્યો દિવ્યમાલ્યામ્બરાન્વિતૌ ॥ ૬૪॥

વિમાનેઽભિમતે પ્રાપ્તે જગ્મતુસ્ત્રિદશાલયમ્ ।
તત્ર દેવપતિઃ કૃષ્ણો મોક્ષયિત્વા ગજોત્તમમ્ ॥ ૬૫॥

ઋષિભિસ્તૂયમાનસ્તુ ગુહ્યૈર્વેદપદાક્ષરૈઃ ।
ગતઃ સ ભગવાન્વિષ્ણુર્દુર્વિજ્ઞેયગતિર્વિભુઃ ॥ ૬૬॥

ગજેન્દ્રમોક્ષણં દૃષ્ટ્વા સર્વે સેન્દ્રપુરોગમાઃ ।
બ્રાહ્મણાનગ્રતઃ કૃત્વા સર્વે પ્રાઞ્જલયોઽભવન્ ॥ ૬૭॥

ગજેન્દ્રમોક્ષણં પુણ્યં સર્વપાપવિમોચનમ્ ।
શ્રાવયન્પ્રાતરુત્થાય સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૬૮॥

શ્રદ્ધયા હિ યદુશ્રેષ્ઠ સ્મૃતેન કથિતેન ચ ।
ગજેન્દ્રમોક્ષણેનૈવ દીર્ઘમાયુરવાપ્નુયાત્ ॥ ૬૯॥

મયા તે કથિતં દિવ્યં પવિત્રં પાપનાશનમ્ ।
કીર્તયસ્વ મહાબાહો મહાદુઃસ્વપ્નનાશનમ્ ॥ ૭૦॥

કીર્ત્યમાનં ચ વિપ્રેભ્યઃ શ‍ૃણુ ભક્ત્યા યથોદિતમ્ ॥ ૭૧॥

વરં વરેણ્યં વરપદ્મનાભં નારાયણં પદ્મનિધિં સુરેશમ્ ।
તં દેવગુહ્યં પુરુષં પુરાણં વવન્દિરે બ્રહ્મવિદાં વરિષ્ઠાઃ ॥ ૭૨॥

એતત્પુણ્યં યદુશ્રેષ્ઠ નરાણાં પાપકર્મિણામ્ ।
દુઃસ્વપ્નદર્શને ઘોરે શ્રુત્વા પાપાત્પ્રમુચ્યતે ॥ ૭૩॥

ભક્તિમાન્પુણ્ડરીકાક્ષે ગજો દુઃખાદ્વિમોચિતઃ ।
તથા ત્વમપિ રાજેન્દ્ર પ્રપદ્ય શરણં હરિમ્ ।
વિમુક્તઃ સર્વપાપેભ્યઃ પ્રાપ્સ્યસે પરમાં ગતિમ્ ॥ ૭૪॥

ઇતિ શ્રીવિષ્ણુધર્મોત્તરે પ્રથમખણ્ડે માર્કણ્ડેયવજસંવાદે
ગજેન્દ્રમોક્ષણં નામ ચતુર્નવત્યધિકશततમોઽધ્યાયઃ ॥ ૧.૧૯૪॥

*Gajendramokshanah from VishnudharmottarapurAna*

pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*